


**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2020; 2(4): 281-282
Received: 10-08-2020
Accepted: 19-09-2020

**निहारिका**
पीएच–डी, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

# योगे अभ्यास–वैराग्ययोः महत्तम्

## निहारिका

**प्रस्तावना**
योगशास्त्रे चित्तवृत्तीनां निरोधार्थम् अभ्यास–वैराग्ययोः महत्तम् बहुधा स्वीक्रियते। चित्तवृत्तीनां प्रवाहः परम्परागत–संस्कारबलेन। सांसारिक भोगं प्रति सर्वदा प्रवहमानाः भवन्ति। तादृश–प्रवाह–शमनोपायः वैराग्यम् अस्ति एवञ्च चित्तं कल्याणमार्गे नेतुम् या उपायः वर्त्तते स अभ्यासः एव।

**अभ्यास–वैराग्यम् –** व्यासदेवादयः चित्तस्योपमा नद्या ददति। अस्याः नद्याः द्विविधवाहिनीत्वमपि स्वीकुर्वन्ति। धारेयं वृत्तिरूपा इत्यपि कथयन्ति। धारयोः प्रवाहक्षेत्रमपि भिन्नम् इत्यपि अस्य गदन्ति। तत्र प्रथम धारा अन्तर्मुखी द्वितीया च बहिर्मुखी।
प्रथमान्तर्मुखी कल्याणकर्त्री अन्या च अकल्याणकीं। प्रथमेयं मोक्षदायिनी द्वितीयेयं संसारदायिनी। प्रथमान्तरविषयालम्बिनी द्वितीया च बाह्यविषयालम्बिनी। प्रथमेयम् एकविषयाभिमुखी अपरेयमनेकविषयाभिमुखी। प्रथमा चित्तस्थैर्यनिमित्तिक अन्या च चित्तचाञ्चल्यनिमित्तिका। प्रथमैका अध्यात्मविषयानुरागिनी अपरैका च भौतिकविषयानुरागिणी। प्रथमा वास्तविक–ज्ञानजनिका द्वितीया अवास्तविकज्ञानजनिका।

**प्रथमा पारमार्थिक–** सुखोत्पादिनी द्वितीया च काल्पनिकसुखोत्पादिनी। इत्थं चित्तनद्यां द्विविधवृत्तिरूपतरघ्गौ उदयलीनप्रक्रियया व्यस्तौ भवतः। चित्तनद्याः हानिकरबहिर्प्रवाहावरोधार्थं लाभकरान्तःप्रवाहप्रवोधनार्थं च अभ्यासवैराग्यसाधनाभ्यासः उपदिष्टः। तत्र प्रथमतया वैराग्येण चित्तस्य बर्हिमुखधारा अवरुध्यते तदनन्तरं (बाह्यविषयणां निरोधनानन्तरम) चित्तस्य अन्तर्धारा अभ्यासन दृढायत। अतः चित्तस्य विषयस्रोतावरोद्धं विवेकस्रोतः उदघाटनार्थञ्च अभ्यास–वैराग्यसाधनमपेक्षते।
''तत्र वैराग्येण विषयस्रोतः खिलीक्रियते विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घाटयते इत्युभयाधीनश्चित्तवृत्तिनिरोधः।''
श्रीमद्भगवद्गीतायामपि भगवता श्रीकृष्णेन दुर्निगृहीतमनसः ऐकायर्थम् अभ्यासवैराग्यो–पायोपदिष्टः। ''असंशयं महाबाहो! मनो दुर्निग्रहं चलम्। अभ्यासेन तु कौन्तेय! वैराग्येण च गृह्यते।।'' नारायणतीर्थः आचार्यः उपर्युक्तप्रघट्टकानाम् आशयाः इत्थं ददाति।

**''यथाभिव–द्वनद्या** द्विविधप्रवाहो ग्रामनगरादिमञ्जनानुकूलः सेत्वादिना प्रतिबद्धयते, क्षेत्रधनुकूलश्चाल्पकुल्या–खननादिन सम्पाद्यते,एवं चित्तनद्याः संसारसागराभिमुखौ विषयभूमिगोऽनर्थप्रवाहो वैराग्येण भज्यते।''

**आशयः–** वर्षाकाले नद्याः प्रवाहो द्विविधो भवति। येन एकेन ग्रामनगरादयः जलमग्नाः भवन्ति स हानिप्रदो भवति परं येनापरेण कृषिक्षेत्रदयो सिञ्चिताः जायन्ते स प्रवाहः लाभप्रदः कथ्यते। सेत्वादिना विनाशकप्रवाहः अवरुद्धयते परं लाभप्रदप्रवाहात् क्षेत्रद्यनुकूलश्चाल्पकुल्याऽननादिना एनं लाभप्रदप्रवाहम् वरीवर्द्धयते। एवमेव वैराग्येण चिन्तनद्याः विषयमार्गमनुसृत्य संसारसागरं प्रति प्रवहमानानर्थकरप्रवाहः विषयमार्गात् अवरुद्धयते। एवञ्च अभ्यासेन आत्ममार्गमनुसृत्य मोक्षरूपसमुद्र प्रात प्रवाहमानद्वितीयको लाभप्रदप्रवाहः दृढीयते। ज्योतिष्टोमयागसम्पादनाथम् अंगयागप्रयाजादयपेक्षितां भवन्ति यतोहि तस्य अपूर्वरूपव्यापारो भिन्नो भवति। एवमेव अभ्यासवैराग्यमाध्यमेन चित्तस्थितिः एवञ्च दोषदर्शनरूपज्ञानप्रसादाभ्याम् चित्तवृत्तीनां निरोद्धुं सक्षमो भवितुमर्हति।

**Corresponding Author:**
**निहारिका**
पीएच–डी, श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत विश्वविद्यालय, नई दिल्ली, भारत

**संदर्भ**


1. श्रीवास्तव, सुरेशचन्द्र, पातंजल–योगदर्शनम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, 2009.
2. कर्णाटक, विमला, योगसिद्धान्तचन्द्रिका, चौखम्भा संस्कृति सीरीज ऑफिस, वाराणसी, 2000.
3. उपाध्याय, बलदेव, भारतीय दर्शन की रूपरेखा, चौखम्भा ओरियन्टालिया, दिल्ली, 1971.
4. ईश्वरकृष्ण, सांख्यकारिका, नेशनल पब्लिकेशन हाउस, दिल्ली, 1969.
5. A Bibliography of Dictionaries and Encyclopedia, National Library, Calcutta, 1964.
6. Williams, Monier Sanskrit English Dictionary, M.L.B.D.k~ 2005.
7. आप्टे, वामन शिवराम, संस्कृत हिंदी कोश, रचना प्रकाशन, जयपुर, 2006.
8. देव, राधाकान्त, शब्दकल्पद्रूम, एम–एल–बी–डी–, दिल्ली, 1961.